कारक-विभक्ति-परिचयः

वाक्ये क्रियायाः साक्षात् अन्वयः येन पदेन/शब्देन सह भवति तत् पदं कारकं भवति। कारकाणाम् अर्थं प्रकटयितुं येषां प्रत्ययानां संयोजनं शब्दैः सह भवति ते (प्रत्ययाः) कारक-विभक्तयः भवन्ति।

यथा- छात्राः![11] दशरथस्य[10] सुतः[1] रामः[2] दण्डकारण्यात्[8] लङ्कां[3] गत्वा युद्धे[9] रावणं[4] बाणेन[6] हत्वा विभीषणाय[7] लङ्काराज्यम्[5] अयच्छत्[12]।

क्रमसंख्या	शब्दाः/पदानि	कारकम्	विभक्तिः
1, 2	सुतः, रामः	कर्ता	प्रथमा
3, 4, 5	लङ्कां, रावणं, लङ्काराज्यम्	कर्म	द्वितीया
6	बाणेन	करणम्	तृतीया
7	विभीषणाय	सम्प्रदानम्	चतुर्थी
8	दण्डकारण्यात्	अपादानम्	पञ्चमी
9	युद्धे	अधिकरणम्	सप्तमी

विशेषः- षष्ठी-विभक्तेः अर्थ सम्बन्धः अस्ति। सम्बन्धः सम्बोधनं च कारकं न भवति। उदाहरणम्-'दशरथस्य'[10] 'हे छात्राः'[11] इति पदयोः साक्षात् अन्वयः क्रियया 'अयच्छत्'[12] इत्यनेन पदेन सह नास्ति। अतः संस्कृते एते पदे कारके न भवतः।



शब्दरूपाणि

अकारान्त-पुँल्लिङ्ग-शब्दः

बालक

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	बालकः	बालकौ	बालकाः
द्वितीया	बालकम्	बालकौ	बालकान्
तृतीया	बालकेन	बालकाभ्याम्	बालकैः
चतुर्थी	बालकाय	बालकाभ्याम्	बालकेभ्यः
पञ्चमी	बालकात्	बालकाभ्याम्	बालकेभ्यः
षष्ठी	बालकस्य	बालकयोः	बालकानाम्
सप्तमी	बालके	बालकयोः	बालकेषु
सम्बोधनम्	हे बालक!	हे बालकौ!	हे बालकाः!

एवमेव नृप-देव-राम-पितामह-पण्डित-इत्यादीनाम् अकारान्त-पुँल्लिङ्ग-शब्दानां रूपाणि भवन्ति।

आकारान्त-स्त्रीलिङ्ग-शब्दः

बालिका

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	बालिका	बालिके	बालिकाः
द्वितीया	बालिकाम्	बालिके	बालिकाः
तृतीया	बालिकया	बालिकाभ्याम्	बालिकाभिः
चतुर्थी	बालिकायै	बालिकाभ्याम्	बालिकाभ्यः

पञ्चमी	बालिकायाः	बालिकाभ्याम्	बालिकाभ्यः
षष्ठी	बालिकायाः	बालिकयोः	बालिकानाम्
सप्तमी	बालिकायाम्	बालिकयोः	बालिकासु
सम्बोधनम्	हे बालिके!	हे बालिके!	हे बालिकाः!

एवमेव लता-रमा-माला-कलिका-इत्यादीनाम् आकारान्त-स्त्रीलिङ्ग-शब्दानां रूपाणि भवन्ति।

अकारान्त-नपुंसकलिङ्ग-शब्दः

पुष्प

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पुष्पम्	पुष्पे	पुष्पाणि
द्वितीया	पुष्पम्	पुष्पे	पुष्पाणि
तृतीया	पुष्पेण	पुष्पाभ्याम्	पुष्पैः
चतुर्थी	पुष्पाय	पुष्पाभ्याम्	पुष्पेभ्यः
पञ्चमी	पुष्पात्	पुष्पाभ्याम्	पुष्पेभ्यः
षष्ठी	पुष्पस्य	पुष्पयोः	पुष्पाणाम्
सप्तमी	पुष्पे	पुष्पयोः	पुष्पेषु
सम्बोधनम्	हे पुष्प!	हे पुष्पे!	हे पुष्पाणि।

एवमेव फल-पुस्तक-नगर-मित्र-उद्यान-इत्यादीनाम् अकारान्त-नपुंसकलिङ्ग-शब्दानां रूपाणि भवन्ति।



इकारान्त-पुँल्लिङ्ग-शब्दः

मुनि

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मुनिः	मुनी	मुनयः
द्वितीया	मुनिम्	मुनी	मुनीन्
तृतीया	मुनिना	मुनिभ्याम्	मुनिभिः
चतुर्थी	मुनये	मुनिभ्याम्	मुनिभ्यः
पञ्चमी	मुनेः	मुनिभ्याम्	मुनिभ्यः
षष्ठी	मुनेः	मुन्योः	मुनीनाम्
सप्तमी	मुनौ	मुन्योः	मुनिषु
सम्बोधनम्	हे मुने!	हे मुनी!	हे मुनयः!

एवमेव कवि-हरि-रवि-कपि-इत्यादीनाम् इकारान्त-पुँल्लिङ्ग-शब्दानां रूपाणि भवन्ति।

उकारान्त-पुँल्लिङ्ग-शब्दः

भानु

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	भानुः	भानू	भानवः
द्वितीया	भानुम्	भानू	भानून्
तृतीया	भानुना	भानुभ्याम्	भानुभिः
चतुर्थी	भानवे	भानुभ्याम्	भानुभ्यः
पञ्चमी	भानोः	भानुभ्याम्	भानुभ्यः
षष्ठी	भानोः	भान्वोः	भानूनाम्
सप्तमी	भानौ	भान्वोः	भानुषु
सम्बोधनम्	हे भानो!	हे भानू!	हे भानवः!

एवमेव शिशु-साधु-गुरु-विष्णु-इत्यादीनाम् उकारान्त-पुँल्लिङ्ग-शब्दानां रूपाणि भवन्ति।



धातु-रूपाणि

पठ् (पढ़ना)

लट्लकारः (वर्तमानकालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	पठति	पठतः	पठन्ति
मध्यमपुरुषः	पठसि	पठथः	पठथ
उत्तमपुरुषः	पठामि	पठावः	पठामः

लृट्लकारः (भविष्यत्कालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	पठिष्यति	पठिष्यतः	पठिष्यन्ति
मध्यमपरुषः	पठिष्यसि	पठिष्यथः	पठिष्यथ
उत्तमपुरुषः	पठिष्यामि	पठिष्यावः	पठिष्यामः

लङ्लकारः (अतीतकालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अपठत्	अपठताम्	अपठन्
मध्यमपुरुषः	अपठः	अपठतम्	अपठत
उत्तमपुरुषः	अपठम्	अपठाव	अपठाम

लोट्लकारः (अनुज्ञा/आदेशः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	पठतु	पठताम्	पठन्तु
मध्यमपुरुषः	पठ	पठतम्	पठत
उत्तमपुरुषः	पठानि	पठाव	पठाम

एवमेव हस्, चल्, खेल्, खाद्, पा (पिब), दृश् (पश्य), धाव्, पत्, भ्रम्, लिख्, इष् (इच्छा), मिल्-प्रभृतीनां धातूनां रूपाणि भवन्ति।

गम्-गच्छ् (जाना)

लट्लकारः (वर्तमानकालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	गच्छति	गच्छतः	गच्छन्ति
मध्यमपुरुषः	गच्छसि	गच्छथः	गच्छथ
उत्तमपुरुषः	गच्छामि	गच्छावः	गच्छामः

लृट्लकारः (भविष्यत्कालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	गमिष्यति	गमिष्यतः	गमिष्यन्ति
मध्यमपरुषः	गमिष्यसि	गमिष्यथः	गमिष्यथ
उत्तमपुरुषः	गमिष्यामि	गमिष्यावः	गमिष्यामः



लङ्लकारः (अतीतकालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अगच्छत्	अगच्छताम्	अगच्छन्
मध्यमपुरुषः	अगच्छः	अगच्छतम्	अगच्छत
उत्तमपुरुषः	अगच्छम्	अगच्छाव	अगच्छाम

लोट्-लकारः (अनुज्ञा/आदेशः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	गच्छतु	गच्छताम्	गच्छन्तु
मध्यमपुरुषः	गच्छ	गच्छतम्	गच्छत
उत्तमपुरुषः	गच्छानि	गच्छाव	गच्छाम

स्था-तिष्ठ (ठहरना)

लट्लकारः (वर्तमानकालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपरुषः	तिष्ठति	तिष्ठतः	तिष्ठन्ति
मध्यमपुरुषः	तिष्ठसि	तिष्ठथः	तिष्ठथ
उत्तमपुरुषः	तिष्ठामि	तिष्ठावः	तिष्ठामः

लृट्लकारः (भविष्यत्कालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	स्थास्यति	स्थास्यतः	स्थास्यन्ति
मध्यमपुरुषः	स्थास्यसि	स्थास्यथः	स्थास्यथ
उत्तमपुरुषः	स्थास्यामि	स्थास्यावः	स्थास्यामः

लङ्लकारः (अतीतकालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अतिष्ठत्	अतिष्ठताम्	अतिष्ठन्
मध्यमपुरुषः	अतिष्ठः	अतिष्ठतम्	अतिष्ठत
उत्तमपुरुषः	अतिष्ठम्	अतिष्ठाव	अतिष्ठाम

लोट्-लकारः (अनुज्ञा/आदेशः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तिष्ठतु	तिष्ठताम्	तिष्ठन्तु
मध्यमपुरुषः	तिष्ठ	तिष्ठतम्	तिष्ठत
उत्तमपुरुषः	तिष्ठानि	तिष्ठाव	तिष्ठाम

नी-नय् (लेना)

लट्लकारः (वर्तमानकालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	नयति	नयतः	नयन्ति
मध्यमपुरुषः	नयसि	नयथः	नयथ
उत्तमपुरुषः	नयामि	नयावः	नयामः

लृट्लकारः (भविष्यत्कालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	नेष्यति	नेष्यतः	नेष्यन्ति
मध्यमपुरुषः	नेष्यसि	नेष्यथः	नेष्यथ
उत्तमपुरुषः	नेष्यामि	नेष्यावः	नेष्यामः

लङ्लकारः (अतीतकालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अनयत्	अनयताम्	अनयन्
मध्यमपुरुषः	अनयः	अनयतम्	अनयत
उत्तमपुरुषः	अनयम्	अनयाव	अनयाम



लोट्-लकारः (अनुज्ञा/आदेशः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	नयतु	नयताम्	नयन्तु
मध्यमपुरुषः	नय	नयतम्	नयत
उत्तमपुरुषः	नयानि	नयाव	नयाम

चिन्त् (सोचना)

लट्लकारः (वर्तमानकालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चिन्तयति	चिन्तयतः	चिन्तयन्ति
मध्यमपरुषः	चिन्तयसि	चिन्तयथः	चिन्तयथ
उत्तमपुरुषः	चिन्तयामि	चिन्तयावः	चिन्तयामः

लृट्लकारः (भविष्यत्कालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चिन्तयिष्यति	चिन्तयिष्यतः	चिन्तयिष्यन्ति
मध्यमपुरुषः	चिन्तयिष्यसि	चिन्तयिष्यथः	चिन्तयिष्यथ
उत्तमपुरुषः	चिन्तयिष्यामि	चिन्तयिष्यावः	चिन्तयिष्यामः



लङ्लकारः (अतीतकालः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अचिन्तयत्	अचिन्तयताम्	अचिन्तयन्
मध्यमपुरुषः	अचिन्तयः	अचिन्तयतम्	अचिन्तयत
उत्तमपुरुषः	अचिन्तयम्	अचिन्तयाव	अचिन्तयाम

लोट्-लकारः (अनुज्ञा/आदेशः)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चिन्तयतु	चिन्तयताम्	चिन्तयन्तु
मध्यमपुरुषः	चिन्तय	चिन्तयतम्	चिन्तयत
उत्तमपुरुषः	चिन्तयानि	चिन्तयाव	चिन्तयाम

उपर्युक्तानुसारमेव हस्, चल्, खेल्, खाद्, पा, दृश्, धाव्, पत्, भ्रम्, लिख्, इष्, मिल्–प्रभृतीनां धातूनां रूपाणि भवन्ति।